श्री कामकळाकाळी संजीवन गद्य स्तोत्रं

श्री कामकळाकाळी संजीवन गद्य स्तोत्रं

महाकाल उवाच |
अथ वक्ष्ये महेशानि महापातकनाशनं |
गद्यं सहस्रनाम्नस्तु संजीवनतया स्थितं || 1 ||

पठन् यत्सफलं कुर्यात् प्राक्तनं सकलं प्रिये |
अपठन् विफलं तत्तत्तद्वस्तु कथयामि ते || 2 ||

ॐ फ्रें जय जय कामकळाकाळि कपालिनि सिद्धिकराळि सिद्धिविकराळि महावळिनि त्रिशुलिनि नरमुंडमालिनि शववाहिनि कात्यायनि महाट्टहासिनि सृष्टिस्थितिप्रळयकारिणि दितिदनुजमारिणि श्मशानचारिणि | महाघोररावे अध्यासितदावे अपरिमितबलप्रभावे | भैरवीयोगिनीडाकिनीसहवासिनि जगद्भासिनि स्वपदप्रकाशिनि | पापौघहारिणि आपदुद्धारिणि अपमृत्युवारिणि | बृहन्मद्यमानोदरि सकलसिद्धिकरि चतुर्दशभुवनेश्वरि | गुणातीतपरमसदाशिवमोहिनि अपवर्गरसदोहिनि रक्तार्णवलोहिनि | अष्टनागराजभूषितभुजदंडे आकृष्टकोदंडे परमप्रचंडे | मनोवागगोचरे मखकोटिमंत्रमयकलेवरे महाभीषणतरे प्रचलजटाभारभास्वरे सजलजलदमेदुरे जन्ममृत्युपाशभिदुरे सकलदैवतमयसिंहासनाधिरूढे गुह्यातिगुह्य परापरशक्तितत्त्वरूढे वाङ्मयीकृतमूढे | प्रकृत्यपरशिवनिर्वाणसाक्षिणि त्रिलोकीरक्षणि दैत्यदानवभक्षिणि | विकटदीर्घदंष्ट्र संचूर्णितकोटिब्रह्मकपाले चंद्रखंडांकितभाले देहप्रभाजितमेघजाले | नवपंचचक्रनयिनि महाभीमषोडशशयिनि सकलकुलाकुलचक्रप्रवर्तिनि निखिलरिपुदलकर्तिनि महामारीभयनिवर्तिनि लेलिहानरसनाकराळिनि त्रिलोकीपालिनि त्रयस्त्रिंशत्कोटिशस्त्रास्त्रशालिनि | प्रज्वलप्रज्वलनलोचने भवभयमोचने निखिलागमादेशितष्ठुसुरोचने | प्रपंचातीतनिष्कळतुरीयाकारे अखंडानंदाधारे निगमागमसारे | महाखेचरीसिद्धिविधायिनि निजपदप्रदायिनि महामायिनि घोराट्टहाससंत्रासितत्रिभुवने चरणकमलद्वयविन्यासखर्वीकृतावने विहितभक्तावने |

ॐ क्लीं क्रों स्फ्रों हूं ह्रीं छ्रीं स्त्रीं फ्रें भगवति प्रसीद प्रसीद जय जय जीव जीव ज्वल ज्वल प्रज्वल प्रज्वल हस हस नृत्य नृत्य क छ भगमालिनि भगप्रिये भगातुरे भगांकिते भगरूपिणि भगप्रदे भगलिंगद्राविणि | संहारभैरवसुरतरसलोलुपे व्योमकेशि पिंगकेशि महाशंखसमाकुले खर्परविहस्तहस्ते रक्तार्णवद्वीपप्रिये मदनोन्मादिनि | शुष्कनरकपालमालाभरणे विद्युत्कोटिसमप्रभे नरमांसखंडकवलिनि | वमदग्निमुखि फेरुकोटिपरिवृते करताळिकात्रासितत्रिविष्टपे | नृत्य प्रसारितपादाघातपरिवर्तितभूवलये | पदभारावनम्रीकृतकमठशेषाभोगे | कुरुकुल्ले कुंचतुंडि रक्तमुखि यमघंटे चर्चिके | दैत्यासुर दैत्यराक्षस दानव कुष्मांड प्रेत भूत डाकिनी विनायक स्कंद घोणक क्षेत्रपाल पिशाच ब्रह्मराक्षस वेताल गुह्यक सर्पनाग ग्रहनक्षत्रोत्पात चौराग्नि स्वापदयुद्धवज्रोपलाशनि वर्षविद्युन्मेघविषोपविष कपटकृत्याभिचार द्वेषवशीकरणोच्चाटनोन्मादापस्मार भूतप्रेतपिशाचावेश नदनदी समुद्रावर्तकांतार घोरांधकार महामारी बालग्रह हिंस्र सर्वस्वापहारि मायाविद्युद्दस्युवंचक दिवाचर रात्रिंचर संध्याचर शृंगिनखि दंष्ट्रि विद्युदुल्कारण्यदरप्रांतरादि नानाविधमहोपद्रवभंजनि | सर्वमंत्रतंत्रयंत्र कुप्रयोगप्रमर्दिनि | षडाम्नाय समय विद्याप्रकाशिनि श्मशानाध्यासिनि | निजबल प्रभाव पराक्रम गुणवशीकृत कोटिब्रह्मांडवर्ति भूतसंघे | विराड्रूपिणि सर्वदेवमहेश्वरि सर्वजनमनोरंजनि सर्वपापप्रणाशिनि अध्यात्मिकाधिदैविकाधिभौतिकादि विविधहृदयाधिनिर्दळिनि कैवल्यनिर्वाणवलिनि दक्षिणकाळि भद्रकाळि चंडकाळि कामकळाकाळि कौलाचारव्रतिनि कौलाचारकूजिनि कुलधर्मसाधनि जगत्कारणकारिणि महारौद्रि रौद्रावतारे अबीजे नानाबीजे जगद्बीजे काळेश्वरि कालातीते त्रिकालस्थायिनि महाभैरवे भैरवगृहिणि जननि जनजननिवर्तिनि प्रळयानलज्वालाजालजिह्वे विखर्वोरु फेरुपोतलालिनि मृत्युंजयहृदयानंदकरि विलोलव्यालकुंडल उलूकपक्षच्छत्रमहाडामरि नियुतवक्त्रबाहुचरणे सर्वभूतदमनि नीलांजनसमप्रभे योगींद्र हृदयांबुजासनस्थित नीलकंठ देहार्धहारिणि षोडश कळांतवासिनि हकारार्धचारिणि कालसंकर्षिणि कपालहस्ते मदघूर्णितलोचने निर्वाणदीक्षाप्रसादप्रदे निंदानंदाधिकारिणि मातृगणमध्यचारिणि त्रयस्त्रिंशत्कोटित्रिदश तेजोमयविग्रहे प्रळयाग्निरोचिनि विश्वकर्त्रि विश्वाराध्ये विश्वजननि विश्वसंहारिणि विश्वव्यापिके विश्वेश्वरि निरुपमे निर्विकारे निरंजने निरीहे निस्तरंगे निराकारे परमेश्वरि परमानंदे परापरे प्रकृतिपुरुषात्मिके प्रत्ययगोचरे प्रमाणभूते प्रणवस्वरूपे संसारसारे सच्चिदानंदे सनातनि सकले सकलकळातीते सामरस्यसमयिनि केवले कैवल्यरूपे कल्पनातिगे काललोपिनि कामरहिते कामकळाकाळि भगवति ||

ॐ ख्रैं ह्सौः सौः श्रीं ऐं ह्रौं क्रों स्फ्रों सर्वसिद्धिं देहि देहि मनोरथान् पूरय पूरय मुक्तिं नियोजय नियोजय भवपाशं समुन्मूलय समुन्मूलय जन्ममृत्यू तारय तारय परविद्यां प्रकाशय प्रकाशय अपवर्गं निर्माहि निर्माहि संसारदुःखं यातनां विच्छेदय विच्छेदय पापानि संशमय संशमय चतुर्वर्गं साधय साधय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं यान् वयं द्विष्मो ये चास्मान् विद्विषंति तान् सर्वान् विनाशय विनाशय मारय मारय शोषय शोषय क्षोभय क्षोभय मयि कृपां निवेशय निवेशय फ्रें ख्रैं हस्फ्रें ह्स्ख्रैं हूं स्फ्रों क्लीं ह्रीं जय जय चराचरात्मक ब्रह्मांडोदरवर्ति भूतसंघाराधिते प्रसीद प्रसीद तुभ्यं देवि नमस्ते नमस्ते नमस्ते ||

इतीदं गद्यमुदितं मंत्ररूपं वरानने |
सहस्रनामस्तोत्रस्य आदावंते च योजयेत् || 3 ||

अशक्नुवानौ द्वौ वारौ पठेच्छेष इमं स्तवं |
सहस्रनामस्तोत्रस्य तदैव प्राप्यते फलं || 4 ||

अपठन् गद्यमेतत्तु तत्फलं न समाप्नुयात् |
यत्फलं स्तोत्रराजस्य पाठेनाप्नोति साधकः |
तत्फलं गद्यपाठेन लभते नात्र संशयः || 5 ||

इति महाकालसंहितायां द्वादशतमः पटले श्री कामकळाकाळी संजीवन गद्य स्तोत्रं ||